## शास्त्री प्रथम खण्डस्य कृते साहित्यम्
## (साहित्य दर्पणः द्वितीयः परिच्छेदः)

वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः
इमां कारिकायाः सप्रसङ्ग व्याख्या।

आचार्येण विश्वनाथेन काव्य लक्षणे 'वाक्यं रसात्मकं काव्यम्' इति प्रोक्तम्। तत्र किं नाम वाक्यं इति अपेक्षायां आह — 'वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः' इति। योग्यतादि त्रयात्मक पद समूह एव वाक्यमित्यर्थः। तत्र योग्यता — 'पदार्थानां परस्पर सम्बन्धे बाधाभावः' एक पदार्थस्य अपर पदार्थेन सह सम्बन्धे बाधाऽभाव एव योग्यता। यथा — 'गामानय' इत्यत्र गो पदार्थस्य आनय पदार्थेन सह यः सम्बन्धः स बाधितो न वर्तते इति योग्यतायाः सत्त्वाद् वाक्यत्वं भवति। न च बाधस्थलेऽपि यत्र पदार्थानां परस्परं सम्बन्धो वर्तते तत्रापि वाक्यत्वं स्यादिति वाच्यम्। यथा 'वह्निना सिञ्चति' इत्येतस्यापि वाक्यत्वं स्यात्। नहि अग्निः सेचन क्रियायां समर्थः, अपितु दहन क्रियायाम्। अतो नेदं वाक्यम्।

आकाङ्क्षा — एक पदार्थस्य अपरपदार्थेन सह अन्वय अपेक्षा आकाङ्क्षा। सा च श्रोतुः जिज्ञासा रूपा। यथा 'देवदत्तो ग्रामं याति' इत्यत्र गच्छतीति पदस्य निराकाङ्क्षत्वं वाक्यत्वे गौः अश्वः पुरुषो हस्ती इति परस्परं निरपेक्षस्य पद समूहस्यापि वाक्यत्वं स्यात्। एवं च अतिव्याप्तिः स्यात्। अत गवादि अर्थबोधकं सुबन्तं पदं श्रवणानन्तरं अश्वादि पदान्तरं अवबोधकाविरहस्य सिद्धत्वात् आकाङ्क्षा शून्यत्वम्। अतो नेदं वाक्यम्।

आसत्तिः — यस्य पदार्थस्य येन पदार्थेन सह सम्बन्धापेक्षा तेन सह तस्य अव्यवधानेन स्थितिः आसत्तिः। व्यवहितेऽपि इदानीमुच्चरितस्य देवदत्त शब्दस्य दिनान्तरोच्चरितेन गच्छति इति पदेन सङ्गतिः स्यात्। किन्तु ईदृशेन पद समूहेन न भवति बोधः, आसत्ति विरहात्। न चेदं वाक्यम्।

व्यवधानं द्विविधम् — एकं कालव्यवधानम्, अपरं च अनुपयुक्त पदार्थानां प्रयोगः। तत्र कालव्यवधानस्य उदाहरणं पूर्वं उक्तम्। द्वितीयस्य तु 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इति। अत्र 'गिरिरग्निमान्', 'देवदत्तेन भुक्तम्' इति सम्बन्धः उचितोऽस्ति।

---


उपेन्द्र झा
पा/अ
सहा॰ प्रा॰ साहित्य
रा॰ उ॰ सं॰ महावि॰
पुरन्देरा, पूर्णियाँ


Nov 4,

शास्त्रि द्वितीय खण्डस्य कृते साहित्यम्
साहित्यदर्पणः पञ्चम परिच्छेदः

## तात्पर्यवृत्त्या व्यञ्जनाया गतार्थत्व निरसनम् ।

ननु अभिहितान्वयवादिभिः अङ्गीकृता तात्पर्याख्या वृत्तिरेव कथं न व्यङ्ग्यार्थं बोधयतीति चेत्, न । अन्वयमात्र बोधने परिक्षीणायाः तस्या व्यङ्ग्यार्थ बोधने असमर्थत्वात् । यच्च धनिकेन उक्तम् —

"तात्पर्याव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः ।
यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम् ॥" इति

तन्न सम्यक् । तस्योपरि 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति वादिभिरेव पातनीयो दण्डः ।

यत्पुनरुक्तम् — पौरुषेयमपौरुषेयं च वाक्यं सर्वमेव कार्यपरम्, अतत्परत्वे अनुपादेयत्वात् उन्मत्तवाक्यवत् (अयमाशयः वाक्य) ततश्च वाक्यार्थे शब्दानां निरतिशय सुख आस्वादस्य व्यतिरेकेण प्रतिपाद्य प्रतिपादकयोः प्रवृत्त्यौपयिक प्रयोजनात् उपलब्धेः निरतिशय सुखास्वाद एव कार्यत्वेन अवधार्यते । 'यत्परः शब्दः स शब्दार्थः' इति न्यायात् । इति । तत्र प्रष्टव्यम् — किमिदं तत्परत्वं नाम, तदर्थत्वं वा तात्पर्यवृत्त्या तद्बोधकत्वं वा ? आद्ये न विवादः व्यङ्ग्यत्वेऽपि तदर्थतानपायात् । द्वितीये तु केयं तात्पर्याख्या वृत्तिः । अभिहितान्वयवादिभिरङ्गीकृता, तदन्या वा ? आद्ये संसर्गमात्रे (अन्वयबोधमात्रे) परिक्षीणायाः तस्या व्यङ्ग्यार्थ बोधनेऽसमर्थत्वमेव । द्वितीये तु नाममात्रे विवादः । तन्मतेऽपि तुर्या वृत्तिः सिद्धेः ।

ननु तर्हि युगपदेव तात्पर्यशक्त्या विभावादि संसर्गस्य रसादेश्च प्रकाशनम् इति चेत्? न । तयोः विभावादि संसर्गबोध रसादि बोधयोः हेतुफलभावाङ्गीकारात् । यदाह मुनिः 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति । सहभावे च कुतः सव्येतर विषाणयोरिव कार्यकारणभावः ? पौर्वापर्याभावात् । अतो न तात्पर्य वृत्त्या व्यञ्जनाया गतार्थत्वमिति दिक् ।

उपेन्द्र झा
4/11/20
स॰ प्रो॰ साहित्य
रा॰ उ॰ सं॰ महावि॰
पुरकैला, [illegible]

शास्त्रि तृतीय खण्डस्य कृते (साहित्यम्)
साहित्यदर्पणः सप्तम परिच्छेदः

रसानां विरोध प्रकाराः के ? तत्समावेशस्य एकस्मिन् पद्ये कथं कर्तुं युक्त्या शक्यते इति प्रतिपादनम्।

ननु 'अद्भुतः करुण, रौद्र, वीर, भयानकैः' इति उक्तत्वेन विरोधिनोः वीर शृङ्गारयोः कथम् एकत्र —

'कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोड्डमरपुलकं वक्त्रकमलम्।
मुहुः पश्यन् शृण्वन् रजनिचर सेनाकलकलं
जटाजूट ग्रन्थिं द्रढयति रघूणां परिवृढः ॥'

इत्यादौ समावेशः ?

उच्यते — इह एवं मीमांसा व्यतिकर क्रमे, खलु रसानां विरोधितायां अविरोधितायाश्च त्रिधा व्यवस्था —
(1) कयोश्चित् आलम्बनैक्येन,
(2) कयोश्चित् आश्रयैक्येन,
(3) कयोश्चित् आनन्तर्येण।

तत्र वीर शृङ्गारयोः आलम्बनैक्येन विरोधः। तथा= आलम्बनैक्येन हास्य रौद्र बीभत्सैः सम्भोग शृङ्गारस्य, वीर करुण रौद्र भयानक बीभत्सैः विप्रलम्भ शृङ्गारस्य। आलम्बनैक्येन आश्रयैक्येन च वीरभयानकयोः। नैरन्तर्य विभावैक्याभ्यां शान्त शृङ्गारयोः। त्रिधा अपि विरोधो वीरस्याद्भुत रौद्राभ्याम्। शृङ्गारस्य अद्भुतेन, भयानकस्य बीभत्सेन इति।

तेनात्र 'कपोले जानक्याः' इत्यस्मिन् पद्ये वीर शृङ्गारयोः भिन्न आलम्बनत्वात् न विरोधः। एवञ्च वीरस्य नायकनिष्ठत्वेन भयानकस्य प्रतिनायकनिष्ठत्वेन निबन्धे भिन्नाश्रयत्वेन न विरोधः। यच्च नागानन्दे प्रशमाश्रयस्यापि जीमूतवाहनस्य मलयवत्यनुरागो दर्शितः, तत्र 'अहो गीतमहो वादित्रम्' इति अद्भुतस्य अन्तरा निवेशनात् न आनन्तर्याभावात् न शान्त शृङ्गारयोः विरोधः। एवम् अन्यद् अपि ज्ञेयम्।

अलमतिविस्तरेण।

उपेन्द्र झा
4/11/20
असो० प्रो० साहित्य
रा० उ० सं० महावि०
कुरुक्षेत्र, हरियाणा

Nov 4, 2020